# Manikarnika Ashtakam

# મણિકર્ણિકાષ્ટકમ્

## Document Information

Text title : maNikarNikAShTakam

File name : maNikarNikAShTakam.itx

Category : misc, sahitya, aShTaka

Location : doc_z_misc_general

Transliterated by : Aaditya Kalyanaraman

Proofread by : Aaditya Kalyanaraman

Description/comments : From Kavya Sangraha, A Sanskrit Anthology, Dr. John Haeberlin, 1847

Latest update : April 29, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# મણિકર્ણિકાષ્ટકમ્

અથ માહાત્મ્યમ્ ।
અનેકજન્મસાહસ્રતપોધ્યાનશિવાર્ચનૈઃ ।
અદ્વૈતાનન્દસઙ્ગેન લબ્ધવેદાન્તિસત્પદઃ ॥ ૧॥

સદાશિવસુતઃ શાન્તઃ કાશ્યાં ગઙ્ગાધરઃ કવિઃ ।
સર્વતીર્થવરાં દેવીં સ્તૌતિ શ્રીમણિકર્ણિકામ્ ॥ ૨॥

આનન્દકાનનમિદં સુખદં પુરૈવ
    તત્રાપિ ચક્રસરસિ મણિકર્ણિકાથ ।
સ્વઃસિન્ધુસઙ્ગતિરથો પરમાસ્પદઞ્ચ
    વિશ્વેશિતુઃ કિમિહ તન્ન વિમુક્તયે યત્ ॥ ૩॥

ગર્જન્તિ સર્વતીર્થાનિ સ્વસ્વધિષ્ણ્યગતાન્યહો।
કેવલં બલમાસાદ્ય સુમહન્માણિકર્ણિકમ્ ॥ ૪॥

શિવાદ્યા દેવસઙ્ઘાશ્ચ સનકાદ્યા મહર્ષયઃ।
તે સર્વે સ્નાતુમાયાન્તિ મધ્યાહ્ને મણિકર્ણિકામ્ ॥ ૫॥

ઇચ્છન્તિ મરણં તસ્ય મુક્તયે ચામરા અપિ।
અતશ્ચ સ્વકૃતૈઃ શ્લોકૈસ્તાં દેવીં પ્રાર્થયેઽન્વહમ્ ॥ ૬॥

અથ મણિકર્ણિકાષ્ટકમ્ ।
વિષ્ણોઃ સુતપ્તતપસાં ચલિતોત્તમાઙ્ગ
    વિશ્વેશિતુસ્તડિદિવામ્બરતઃ સુકર્ણાત્ ।
યા ચક્રતીર્થસલિલે લલિતાપપાતઃ
    સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૭॥

ચિન્તામણિસ્તનુભૃતાં સહસાન્તકાલે
    તત્તારકં વ્યપદિશત્યથ કર્ણિકાયામ્ ।
યસ્યાં મૃતો ન ભવમેતિ ભવપ્રસાદાત્

સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૮॥

ચન્દ્રાંસુકા સુનયના ધવલા કુમારી
વેદૈશ્ચ પાણિકમલૈર્વરમૌક્તિકાન્ત્યા ।
યા દૃશ્યતે સુકૃતિભિર્વરકાશિકાયાં
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૯॥

માલાં સુપઙ્કજમયીં કરકણ્ઠયોર્યા
ધત્તે વરોદ્યતકરે શુભમાતુલાઙ્ગમ્ ।
બદ્ધ્વઞ્ચ પાણિયુગલં શુભપશ્ચિમાસ્યં
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૧૦॥

દાનાવગાહસુરપૂજનતર્પણાદિ
યસ્યામનન્તફલદં ભવતિ પ્રસઙ્ગાત્ ।
ભક્ત્યા કૃતં યદિ સએવ જગત્પુનાતિ
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૧૧॥

સ્વર્ગસ્તૃણં ભવતિ ચીરધરોઽપિ રાજા
મૃત્યુઃ સખા સુખહરોઽપિ શવઃ શિવઃ સ્યાત્ ।
પાતોઽપિ યત્ર સુરસમ્મત ઉત્તમાદ્યા
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૧૨॥

સુપ્તોઽપિ યોગિસમતાં સમુપૈતિ યત્ર
મગ્નઃ સ્મરેદ્યદિ શિવં સતુ કાલકાલઃ ।
યદ્ધ્યાનતોપ્યભયમેતિ ચ દૂરવાસી
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૧૩॥

યત્સઙ્ગિવાયુરપિ દૂરગતઃ સુસૂક્ષ્મઃ
પાતાલગં સુરગતં વિધિગં કરોતિ ।
જન્તૂન્ પુનાતિ સકલાનપિ ગાં ગતા યા
સા મે સદા શિવકરી મણિકર્ણિકાસ્તુ ॥ ૧૪॥

સંસારચિન્તામણિરત્ર યસ્માત્
તત્તારકં સજ્જનકર્ણિકાયામ્ ।
શિવોઽભિધત્તે સહસાન્તકાલે
તદ્ગીયતેઽસૌ મણિકર્ણિકેતિ ॥ ૧૫॥

મોક્ષલક્ષ્મીમહાપીઠમણિસ્તચરણાઅયોઃ ।
કર્ણિકેતિ તતઃ પ્રાહુર્યાં જના મણિકણિકામ્ ॥ ૧૬॥

મણિકર્ષ્યાઃ સ્તોત્રમિદં ભુક્તિમુક્તિપ્રદમ્બરમ્ ।
પઠતાં શ‍ૃણતાઞ્ચાસ્તુ પ્રસન્ના મણિકર્ણિકા ॥ ૧૭॥

ઇતિ શ્રી ગઙ્ગાધરકવિ વિરચિતં શ્રીમણિકર્ણિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Aaditya Kalyanaraman

*Manikarnika Ashtakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*